॥ त्रिपुरसुन्दरीमानसपूजनस्तोत्रम् ॥

.. tripurasundarImAnasapUjanastotram ..

sanskritdocuments.org

March 25, 2017

.. tripurasundarImAnasapUjanastotram ..

॥ त्रिपुरसुन्दरीमानसपूजनस्तोत्रम् ॥

Sanskrit Document Information

Text title : tripurasundarImAnasapUjanastotram

File name : tripurasundarImAnasapUjanastotram.itx

Location : doc_devii

Author : sAmarAjadIkShita

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description-comments : Brihatstotraratnakara 2, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 225-425

Latest update : March 23, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

Please help to maintain respect for volunteer spirit.

March 25, 2017

sanskritdocuments.org

॥ त्रिपुरसुन्दरीमानसपूजनस्तोत्रम् ॥

श्रीगणेशाय नमः ॥

अमृतजलधिमध्योल्लासिरत्नान्तरीप-
प्रसृमरकिरणालीकल्पितोद्यानशोभे ।
सुरतरुनिकुरम्बस्पृष्टवातायनान्त-
श्चलदलिपटलीभिः क्लृप्तधूपादिकृत्ये ॥ १॥

मणिमयभवनेऽन्तःप्रौढमाणिक्यशाला-
मधिवसति विशाला कापि ते रत्नवेदी ।
तदुपरिकृतवासं दत्तबालार्कहासं
दिशतु शुभमनन्ते देवि सिंहासनं ते ॥ २॥

तदुपरि धृतनानाहेतिभूषाश्मरश्मि-
व्यतिकरपुनरुक्तीभूतरम्योत्तरीयाम् ।
गलदमलदयाम्भःसिक्तभक्तप्ररोहां
प्रणवनलिनभृङ्गीं भावये ज्ञानभङ्गीम् ॥ ३॥

द्रुहिणहरिहराणां मौलिसञ्चारशीलं
मणिघटितविभूषारश्मिनिर्णेजितं च ।
निजमतिदृषदाहं भक्तिगङ्गापयोभिः
पदयुगममलं ते देवि निर्णेजयामि ॥ ४॥

गरुडमणिमयूखस्पर्धिदूर्वासनाथैः
कुशशिशुपरिजुष्टैः स्फीतसिद्धार्थसार्थैः ।
उपहितसितगन्धैः साक्षतैर्वारिभिस्ते
जननि चरणपद्मे पाद्यमाद्यं ददामि ॥ ५॥

फलकुसुमसनाथं नूत्नरत्नप्ररोहं
मलयजरसदिग्धं स्निग्धमुग्धाक्षतं च ।
दरनियमितभक्तानीकवाञ्छाप्रदाने
करसरसिरुहेऽस्मिन्नर्ध्यमर्घ्ये ददामि ॥ ६॥

शिशिरकिरणजातीपत्रदेवप्रसून-
स्फुटितदलनवैलाक्रान्तकक्कोलगन्धम् ।

शिशिरममलमेतद्बद्धपीयूवसख्यं
सलिलमखिलमातस्त्वं प्रसन्नाऽऽचमेथाः ॥ ७॥

नवमणिहयपीठे प्रेतपद्मस्थितापि
प्रपदतरलशोभास्पृष्टसद्विष्टरश्रि ।
दधिमधुघृतमिश्रं त्रिर्विराजोपनीतं
शशिमुखि मधुपर्कं त्वं मुखान्तर्नयेथाः ॥ ८॥

पुनराचमनं कार्यं जगज्जननि सुव्रते ।
त्वच्छिक्षितेन मार्गेण यतो लोकः प्रवर्तते ॥ ९॥

त्वरितसहचरीभिर्दत्तहस्तावलम्बं
चरणनलिनमेतत्पादुकास्थं विधाय ।
प्रविश विविधशालं स्नानगेहान्तरालं
पशुपतिसहितैवाभ्यङ्गमङ्गीकुरुष्व ॥ १०॥

अपि रसिकविगीतं भक्तचित्तानुमत्यै
सदयहृदयभावे स्नाहि पञ्चामृतेन ।
शशिमृगमदमुस्तागारसिद्धार्थचूर्णैः
कुसुमजलविमिश्रैः स्वैरमुद्वर्तयाङ्गम् ॥ ११॥

परिजनपरिमृष्टे त्वच्छरीरे न याव-
च्छिशिरसलिलधारां कापि चिक्षप तावत् ।
उदयिनि जनमातः सीत्कृते बद्धभावै-
स्त्रिपुरमथनहासैर्व्रीडितं क्रीडितं ते ॥ १२॥

अथ विमलितरत्नस्वर्णदुर्वर्णकुम्भै-
स्त्रिभुवनगततीर्थानीतपानीयपूर्णैः ।
स्नपयति सुरनारीवृन्दमेतत्तथापि
प्रणयजलमिदं नः स्नानकृत्यं करोतु ॥ १३॥

विमलधवलचीनप्रच्छदप्रावृताङ्ग्या-
स्तव शिरसिरुहेभ्यो निर्हरेऽम्बाम्बुबिन्दुन् ।
अगरुशकलधूपैर्धूप्यतां चाङ्गमङ्गं
सह पशुपतिना त्वं याहि वासोगृहान्तः ॥ १४॥

नवविमलविचित्रे वाससी नूत्नरत्न-
द्युतिकृतपुनरुक्तायामसंशोभिनी ते ।
अथ कुचपरिणाहाच्छादिनीं शुम्भनेत्र-
त्रितयभवदसूयां कञ्चुकीमर्पयामि ॥ १५॥

नहनमपि कचनां कङ्कतीभिर्विधाय
ग्रथितमणिविभूषां देवि वेणीं करोमि ।
निहितनवकिरीटालम्बिमुक्तबालताभि-
स्ततबहलमयूखां चन्द्रलेखा विदध्याम् ॥ १६॥

अलिकतलविलम्बिस्फीतसीमन्तमुक्ता-
सरणिधटितहीरास्पष्टचन्द्रात्ततन्द्रे ।
विविधमणिगणाङ्कोत्तंससंश्लिष्यदश्मा
श्रवणयुगविभूषा देवि तोषाय भूयात् ॥ १७॥

विविधविरचनाभिर्भिन्नभिन्ना विभूषा
जनयतु तव कण्ठे देवि कामप्यभिख्याम् ।
गुणिनमपि गिरीशश्लेपदत्तान्तरायं
कठिनकुचयुगाग्रे हारमारोपयामि ॥ १८॥

दरतरलविलम्बिस्वर्णसूत्रान्तगुच्छे
जननि तव दिशेतामङ्गदे शर्मकर्म ।
अथ वलयमणीनां रश्मिसम्भिन्नमुद्रां
जनयतु पुनरुक्तां शृङ्खलामन्तरीणाम् ॥ १९॥

मणिमयरशनाधःक्षुद्रघण्टानिनादा
मणितगुणनिकानां स्मारकाः स्युः शिवस्य ।
मरकतमणिजातं मञ्जुमञ्जीरयुग्मं
रचयतु शशिमौले रञ्जनं सिञ्जितेन ॥ २०॥

अरुणमणिकृतानामङ्गुलीभूषणानां
प्रभवतु पदमुस्रैर्लाक्षया रञ्जितं ते ।
मृगमदरचितायां पत्रभङ्गीलताया-
मनुभवतु दृगन्तो बन्धनं भूतभर्तुः ॥ २१॥

भज जननि हरिद्रां दत्तहारिद्रमुद्रां

कुसुमसलिलतैलाक्रान्तकाश्मीरकोशाम् ।
अथ नसि कुरु मुक्तां दन्तवासोऽनुषक्तां
स्मितरुचिपुनरुक्तां नन्दितानेकभक्ताम् ॥ २२॥

सहजनलिननीले खञ्जने खञ्जनानां
भवनिगडगतानां मोचने लोचने ते ।
जननि गिरिशचेतोरञ्जने मन्दमन्दं
मसृणिमसृणितैस्तैरञ्जनैरञ्जनेयम् ॥ २३॥

प्रणतिभिरुपनीतं दीप्तलालाटनेत्र-
प्रतिभटमिव शम्भोर्मृत्युबाधाविरोधि ।
शशिन इव मुखेन्दोर्भेदकः कोऽपि धर्मो
जनयतु मुदमुच्चैः कुङ्कुमं रङ्कुनेत्रे ॥ २४॥

युगपदुपगतेन्द्रोपेन्द्ररुद्रादिमौलि-
स्थलमुकुटविघट्टच्चण्डदण्डाभिघातैः ।
कृतसरणिरजस्रक्रुद्धदौवारिकैस्ते
जननि भव विभूषा प्रेतपद्मासनस्य ॥ २५॥

अहमहमिकयाधः पातुकानां सुराणां
प्रपदमपि शरीरे देवि संयोज्य शीघ्रम् ।
करुणरसमयीनां लोचनान्तश्छटानां
कतिपयवलनाभिर्देहि पूजावकाशम् ॥ २६॥

अगरुघुसृणचोरीशीरगोरोचनाभिः
मलयजमृगनाभिस्फीतकर्पूरपूरैः ।
कुसुमसलिलघृष्टैः कल्पयित्वाङ्गरागं
पटुतरपटवासैर्वासये तेऽङ्गकानि ॥ २७॥

कमलकुमुदमल्लीमालतीकुन्दजाती-
बकुलकनकनीपाशोकचाम्पेयकाद्यैः ।
मरुबकतुलसीभिः केतकीबिल्वपत्रैः
दमनकशतपत्रैरर्चये त्वत्पदाब्जम् ॥ २८॥

हारशेखरवतंसशाटिकाप्रच्छकातुलितकञ्चुकीमुखैः ।
मण्डपैर्जवनिकाभिरुच्चकैः कौसुमैस्तव मुदं कदम्बये ॥ २९॥

कनकमयहसन्तीकोटिमध्यस्थितानां
मृदुपवनधुतानां दीप्तवैश्वानराणाम् ।
अगरुमुपरि हुत्वा गुग्गुलुं सर्जखण्डान्
घृतजतुपरिमिश्रं त्वां शिवे धूपयामि ॥ ३०॥

धूपवर्तितरमन्तरान्तरा गन्धतैलपरिपूर्णदीपिकाः ।
आवहन्तु तव पार्श्वयोस्तरामम्बिके जवनिकापटश्रियम् ॥ ३१॥

सुरसुरभिजसर्पिःपूरिते रत्नपात्रे
हिमकिरणरजोभिर्लोडितां तूलवर्तीम् ।
तरुणदहनयुक्तामम्ब कृत्वा ददेयं
निरयनिरसनाय प्रस्फुरन्तं प्रदीपम् ॥ ३२॥

रजतकनकहीराद्यश्मपात्रेषु मातः
विविधरससनाथैश्चोष्यलेह्यप्रपेयैः ।
उपाहितबहुभक्ष्यैर्व्यञ्जनैश्चारुखाद्यैः
जठरदहनतृप्तिं नित्यतृप्ते चरेथाः ॥ ३३॥

परस्परकुतूहलैः कवलदानरूपैः शिवे
पुराणतरुणौ युवां चरतमत्र लीलाशितम् ।
सुगन्धि सलिलं तथा पिबतमेणनाभीरसैः
सकेसरनिशाकरै रचयतं करोद्वर्तनम् ॥ ३४॥

पनसकदलजम्बूकर्कटीहारहूरामलक-
बदरनिम्बूदुम्बरैर्बीजपूरैः ।
अमृतलकुचबिल्वैर्दाडिमीनालिकेरै
रुचिरुचितफलैस्ते वर्धतां बद्धरागा ॥ ३५॥

शशिकरधवलानां नागवल्लीदलानां
क्रमुककदरजातीचन्द्रसंयोगभाजाम् ।
मृगमदसुरसूनुस्फीतचूर्णावृतानां
भजतु जननि रागं त्वन्मुखाम्भोजमेतत् ॥ ३६॥

कनकभरितपृथ्वीं मानुषानन्दमाहु-
स्तदुपरि शतकोटिक्रामुकानन्दमाहुः ।

जननि तव ददेयं दक्षिणां कां तथापि
प्रथय मयि दृगन्तं दक्षिणावीक्षणेन ॥ ३७॥

त्रिभुवनकुहरेऽस्मिन्पूरिते वेणुवीणा-
पटुपटहकझिल्लीतालघण्टानिनादैः ।
उरगसुरवधूभिर्गीयमानं समन्तात्
जनयतु पदमुच्चैर्देवि नीराजनं ते ॥ ३८॥

प्राणेषु पञ्चसु निधाय षडात्मवृत्ति-
वर्तीश्चिदग्निपरिचुम्बितजातशोभाः ।
नीराजयामि भवतीं भवतीव्रताप-
निर्वापहेतुमधुना मधुनाऽलसाक्षि ॥ ३९॥

उरगतुरगहंसकेकिशालूरभृङ्गी-
मदकलकलविङ्कीश्येनपारावतानाम् ।
गतिभिरुपचितोऽयं मौलितः पादमूलं
हरतु दुरितजातं देवि कर्पूरदीपः ॥ ४०॥

जय देवि जय देवि जय विश्वाधारे
दीनानाथोद्धरणप्रवणे जनसारे ।
त्वत्पदपद्मे पद्मे विधृतव्यापारे
मयि दीने कुरु करुणां करुणामृतपारे ॥ ४१॥

अमृतोदधिमध्यस्थितनवरत्नद्वीपे
विष्वग्विकसितसुरतरुनवचम्पकनीपे ।
नानाकुसुमामोदिनि विधुतागरुधूपे
चिन्तामणिभवनेऽङ्गनतिष्ठत्सुरभूपे ॥ ४२॥

माणिक्योज्ज्वलचत्वरसिंहासनशोभे
शवपञ्चकमञ्चेऽञ्चितजनलोचनलोभे ।
सुश्वेतातपवारणचलचामरदम्भे
ध्याये भवतीमनिशं कृतजगदारम्भे ॥ ४३॥

दलितजपाकुसुमोपमवसनच्छन्नाङ्गीं
तरुणारुणकरुणप्रदकिरणावलिभङ्गीम् ।
दधतीं रचनां नयने यमुनातारङ्गीं

कलयन्तीं कुचकोशे सुषमां नारङ्गीम् ॥ ४४॥

शरपञ्चकबाणासनसृणिपाशोल्लसितां
मलयानिलपरिवाददमुखपद्मश्वसिताम् ।
बालामृतकरमण्डितचूडातटमीहतां
ज्योतिस्त्रितयालङ्कृतनयनत्रयसहिताम् ॥ ४५॥

पशुपतियन्त्रणपटुतररोमावलियूपां
मन्मथतस्करगुप्तिक्षमनाभीकूपाम् ।
प्रपदालम्बिशिखामणिवृन्दारकभूपां
कमलासनहरिहरमुखचिन्त्यामितरूपाम् ॥ ४६॥

काली बगला बाला तारा भुवनेशी
वाराही मातङ्गी कमला वचनेशी ।
छिन्ना दुर्गा गङ्गा काशी कामेशी
त्वत्तो नान्यत्किञ्चित्त्वं चिद्रसपेशी ॥ ४७॥

त्वं भूमिस्त्वं सलिलं त्वं तेजः प्रबलं
त्वं वायुस्त्वं व्योम त्वं चित्तं विमलम् ।
त्वं जीवस्त्वं चेशस्त्वं ब्रह्मास्यमलं
सत्यानृतयोरन्यत्त्वत्तः किं सकलम् ॥ ४८॥

कुलकुण्डे त्वं कुरुषे शयने प्रस्वापं
स्वाधिष्ठाने मिहिरायुतदीधितितापम् ।
नीला नाभौ कण्ठे शशिभा हृतपापं
वर्षस्यमृतं बिन्दावानन्दावापम् ॥ ४९॥

त्वत्पदपद्मे चित्तं त्रिपुरे मे रमतां
तत्रैव प्रतिवेलं मौलिर्मे नमताम् ।
यातायातक्लेशः सद्यः संशमतां
याचे भूयो भूयो भवता मे भवताम् ॥ ५०॥

नृत्यति गायति सुरसं सुरनारीवृन्दे
करतालीदानोत्सुकसुरविततानन्दे ।
नीराजनकाले तव मुनिजननुतवेदे
चरणानतसम्राजः परिहृतभवखेदे ॥ ५१॥

मिलदलिपटलीभिः केवलं घ्रातपूर्वः
स्फुटितकुसुमगर्भः स्वैरसञ्चारिणीभिः ।
उपहितपटवासः पुष्पधूलीकदम्बैः
प्रभवतु पदपाती देवि पुष्पाञ्जलिस्ते ॥ ५२॥

सकृदपि विनताङ्घ्रिस्त्वां परिक्रम्य मातः
भवति मखफलेषु क्षीणलोभं मनो नः ।
सरसिजमकरन्दास्वादतृप्तो मिलिन्दः
क्वचिदपि पिचुमन्दे चित्तवृत्तिं तनोति ॥ ५३॥

जननि खलकपोतन्यायतः पातुकाना-
मधिपदकमलं ते मन्दवृन्दारकाणाम् ।
भवतु नयनयोस्ते गोचरः क्वानतिर्मे
न लसति पुनरुच्चैः स्वैरमुद्ग्रीविका चेत् ॥ ५४॥

विमलमुकुरबिम्बं पुण्डरीकातपत्रं
शिशिरकरसमाने चामरे चामरेशि ।
करितुरगकदम्बं शक्तिभिर्दिश्यमानं
जनय सफलमञ्चल्लोचनालोचनाभिः ॥ ५५॥

अथ कृतपरिवाराभ्यर्चनं ते समर्प्य
स्तुतिभिरनुपमाभिः पावये स्वां रसज्ञाम् ।
यदपि न रविरश्मिः स्वोपकारं विधत्ते
तदपि कमलमालाम्लानहानिं तनोति ॥ ५६॥

श्रवसि विशति यस्य त्वन्मनोरेकवर्णः
सकृदपि विधियोगादम्बिके मानवस्य ।
लघुतरफलमेतद्यत्त्रिवर्गाश्रयत्वं
परिचरति पुरस्तात्पूरुषार्थश्चतुर्थः ॥ ५७॥

हृदयकमलमध्ये त्वां समानीय मातः
पवनभरितनाडीरन्ध्रमुद्राविधिज्ञाः ।
दधति परमधन्याः कुण्डलीस्पर्शहृष्य-
च्छशिगलदमृतौघप्लावजन्यप्रमोदम् ॥ ५८॥

वदति विधिकलत्रं त्वां शिवे कोऽपि कश्चित्
त्रिपुरमथनपुण्यं श्रीपतेः कोऽपि भाग्यम् ।
प्रकृतिमिति परेऽपि प्रौढविज्ञानमेके
निखिलनिगममूलं मन्महे बोधमेव ॥ ५९॥

कदा तव पदाम्बुजस्मरणजातरोमोद्गमः
सदाशिवमदालसे जननि मातरित्युद्गिरन् ।
निलीनकरणक्रियस्त्रिदशगर्वसर्वङ्कषा-
मखर्वपदवीं भजे हरिहरादिभिर्भाविताम् ॥ ६०॥

त्वदीयमुखचन्दिरे चलितलोचनेन्दिन्दिरे
प्रसादकुलमन्दिरे स्थगितपद्मचन्देन्दिरे ।
प्रभापटलतन्तुरे ललितहावकेलीपुरे
हृतस्मरहरान्तरे धृतमतिर्भवं सन्तरे ॥ ६१॥

त्वदीयं यद्रूपं जनजननि बिन्दुत्रययुतं
स्मरन्नन्तर्योगात्त्रिदिवपतितामाप सुरपः ।
इदं को जानीते क्षणमपि हरार्धं प्रजपतां
हसार्धं व्यालम्ब्य प्रतिफलति हंसः परिणतिः ॥ ६२॥

जननि निभृतं यत्ते रूपं वदत्यतिशाश्वतं
लसतु हृदि नो दीपप्रायः स कोऽपि हसात्मकः ।
स्मरणविषये येन स्वैरं स्वरेण विजृम्भता
त्रिपुरमथनः प्रापेशत्वं तदात्मकतां गतः ॥ ६३॥

ऋचामाचार्यासि स्तुतिशतजुषां चापि यजुषां
महाधाम्नां साम्नां प्रथितयशसोऽथर्वशिरसः ।
हरिब्रह्मेशाद्याः प्रपदकिरणोत्तंसमुकुटा-
स्तवातस्त्वां स्तोतुं जनजननि को वा प्रभवतु ॥ ६४॥

त्रस्यत्खञ्जनगञ्जनव्यसनिनीमुन्माथिनीं माद्यतो
जीवञ्जीवकुलस्य भृङ्गपटलीन्यक्कारबद्धव्रताम् ।
रङ्कूच्छङ्कुविधायिनीं च नलिनश्रीगर्वसर्वङ्कषां
कारुण्यामृतवर्षिणीं मयि शिवे दृष्टिं मनाङ्नोटय ॥ ६५॥

रिङ्गद्भृङ्गकदम्बडम्बरपरिष्वङ्गप्रसङ्गाकुल-

प्रत्यूषस्फुरमाणपङ्कजवनीसौभाग्यसर्वङ्कषः ।
दृक्कोणः करुणाङ्कुराङ्कितततनुः कोऽप्यद्रिजे मद्वपुः-
पान्थत्वे तरसा भवेत्परिकरी धन्यस्तदा स्यां न किम् ॥ ६६॥

समुद्यन्मार्तण्डप्रसृमरकरालीमसृणया
पदद्वन्द्वानन्दप्रणयिजनरिङ्गत्करुणया ।
ललल्लीलाभाजा परशिवपरिष्वङ्गपरया
धिया चेतः कालं नय गतनय त्वं क्षणमपि ॥ ६७॥

वेदैरङ्घ्रिभिरुज्ज्वलोपनिषदां वृन्दैरधःकल्पितैः
शास्त्राद्यैरपि तिर्यगूर्ध्वकलितैरोङ्कारमार्गेण च ।
विष्वङ्गात्रनिबन्धनैः परिचितेऽस्मिन्वाङ्मये पञ्जरे
कीरी काचन चेतनैकविभवा चित्ते चकास्ताच्चिरम् ॥ ६८॥

तरुणारुणप्रतिमरम्यरुचिं कुसुमेषुचापसृणिपाशकराम् ।
त्रिगुणात्परां त्रिगुणरूपमयीं भवतीमहर्निशमहं कलये ॥ ६९॥

इति निजमतिवैभवानुरूपामकृत कविर्भुवि सामराजनामा ।
समयिजनमुदेऽम्बिकासपर्याममृतसुखात्मकताविकासपर्याम् ॥ ७०॥

इति श्रीसत्यानन्दनाथापरनामधेयसामराजदीक्षितविरचिते
पूजारत्नवर्ति त्रिपुरसुन्दरीमानसपूजनस्तोत्रं सम्पूर्णम् ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

.. tripurasundarImAnasapUjanastotram ..
was typeset using XƎLaTeX 0.99996
on March 25, 2017

Please send corrections to *sanskrit@cheerful.com*